# Vishnuproktam Shivarchanopadesham 6

# વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશમ્ ૬

## Document Information

Text title : Vishnuproktam Shivarchanopadesham 6

File name : viShNuproktaMshivArchanopadesham6.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 27 madhyArjunamahimAnuvarNanam | 185-228||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# Vishnuproktam Shivarchanopadesham 6

# વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશમ્ ૬

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

કણ્વઃ (ઉવાચ)
સંસારતાપ સન્તપ્તં મમ ચિત્તમભૂદ્ધરે ।
કથં સંસારસન્તાપ વિચ્છિત્તિઃ સ્યાદ્વદસ્વ મે ॥ ૧૮૪॥

વિષ્ણુઃ (ઉવાચ)
સંસાર સાગરે ધારે નિમગ્નાનાં દુરાત્મનામ્ ।
અપારકરુણાસિન્ધુઃ સામ્બ એવાવલમ્બનમ્ ॥ ૧૮૫॥

- -

શિવમેવ ભજસ્વ સાવધાનં
સતુ સંસારદુરન્તદુઃખ હારી ।
બહુવસ્તમુપાસ્ય મુક્તિમાપુ-
સ્ત્રિપુરારિનિજભક્તમુક્તિ હેતુ ॥ ૧૮૬॥

નવબિલ્વદલૈરથાન્તકાન્તકં
યજ કામાન્તક મન્તકાન્તકમ્ ।
વિપદન્તકમન્તકાન્તકં
શિવલિઙ્ગાત્મકમાશુ સન્તતમ્ ॥ ૧૮૭॥

બહુપાપવિમોચકં પ્રભું
યદિકાલાન્તકમર્ચયિષ્યતિ ।
સતતં નિયતં તદા ભવા-
ન્વિષસંસારવશં ન યાસ્યતિ ॥ ૧૮૮॥

ભજ ભર્ગમનર્ગલપ્રભું
ભગવન્તં ભગનેવહારિણમ્ ।
ભવભીમભયં તદા મુને
ન ભવન્તં પ્રતિ ભાવયિષ્યતિ ॥ ૧૮૯॥

ભસિતાભરણો ભજ પ્રભું
ભવભીતિર્ન ભવિષ્યતિ ધ્રુવમ્ ।
શુભદસ્ત્વયિ શમ્ભુરવ્યયો
નિયતં તિષ્ઠતિ તં સમર્ચય ॥ ૧૯૦॥

નવબિલ્વપલાશકાશપુષ્પૈઃ
કુશપુષ્પૈઃ કનકાહ્વયપ્રસૂનૈઃ ।
ભસિતેન ચ ભાલલોચનં
શિવલિઙ્ગે સતતં સમર્ચય ॥ ૧૯૧॥

સ કૃદપ્યમલૈઃ સબિલ્વપલ્લવૈઃ
કુશધુત્તૂરપલાશકાશપુષ્પૈઃ ।
સજલૈરભિપૂજ્ય પાર્વતીશં
સકલાપજ્જલધિ તરન્તિ ધીરાઃ ॥ ૧૯૨॥

હૃદિ તિષ્ઠતિ શૈલજાધવે(પતૌ)
શિવલિઙ્ગે ચ નિરન્તરં શુભે ।
ન યજન્તિ નરાધમાઃ સકૃ-
ન્નરકાવાસરતા નિરન્તરમ્ ॥ ૧૯૩॥

વિદધાતિ પરં પદં શિવઃ
કુશપત્રૈરપિ સાધુ પૂજિતઃ ।
તમુપાસ્ય મહેશ્વરં ભ્રમા-
ત્સુરમન્યં સમુપાસતે જનાઃ ॥ ૧૯૪॥

ભગમન્તમુમાપતિં ભવં
ભજનીયં ન ભજન્તિ યે જનાઃ ।
નરકેષુ પતન્તિ તે જનાઃ
સતતં સત્યમુદીર્યતે મયા ॥ ૧૯૫॥

દિવિ યે ન વસન્તિ ભૂતલેઽપિ
ગ્રસિતાઃ સંસૃતિઘોરદન્દશૂકૈઃ ।
દ્વિજ તે શિવપૂજનૌષધં
સમવાપ્યામૃતતાં પ્રયાન્તિ હિ ॥ ૧૯૬॥

સકૃદપ્યતિભક્તિપૂર્વકં

શિવમેવં પ્રણમન્તિ તે જનાઃ ।
અમરૈરખિલૈશ્ચ તે નતાઃ
સતતં સત્યમિદં ધ્રુવં ધ્રુવમ્ ॥ ૧૯૭॥

કૃતસર્વમખોઽપિ જન્મ ધત્તે
કૃતવિશ્વેશપદામ્બુજપ્રણામઃ ।
ન પુનર્જનિભાગ્વદામિ સત્યં
ભુજમુદ્ધૃત્ય ન સંશયં કુરુધ્વમ્ ॥ ૧૯૮॥

અકૃતેશપદામ્બુજપ્રણામા
નરકાવાસમવાપ્ય દુઃખભોગમ્ ।
સમવાપ્ય મુહુર્મુહુર્નિવૃત્તા
ન ભવન્તિ પ્રલયેઽપિ સત્યમેવ ॥ ૧૯૯॥

વિવિધામિતપાતકોચ્ચયા યે
ન નમન્તિ ત્રિપુરારિમાદરેણ ।
અત એવ યમાલયાન્તરે તે
નિવસન્ત્યન્વહમાપ્તદુઃખભોગાઃ ॥ ૨૦૦॥

પ્રણમન્ત્યમરાસ્ત્રિલોચનં
મુનયઃ સિદ્ધગણાશ્ચ સન્તતમ્ ।
નિગમાશ્ચ નમન્તિ યં તતઃ
પ્રણમસ્વ પ્રણમામ્યહં તમીશમ્ ॥ ૨૦૧॥

સકલામરવન્દનીયમૈશં
પદપદ્મં ત્રિદશકભાગધેયમ્ ।
ભજ સન્તતમદ્રિજાસહાયં
નિરપાયં નિરવદ્યમુક્ત્યુપાયમ્ ॥ ૨૦૨॥

યજ કોમલબિલ્વપલ્લવૈ-
રનુવારં ભુજગાધિપૈકહારમ્ ।
સકલાઘહરં નિરસ્તવીરં
હરમારાધય તત્પરં સદારમ્ ॥ ૨૦૩॥

ભજતામભયપ્રદં મહેશં
ભજ મૃત્યુઞ્જયમાદરેણ નિત્યમ્ ।
તમપાસ્ય ન સંવસ દ્વિજં તં

હિતમત્યન્તમુદીરિતં મયા તે ॥ ૨૦૪॥

દ્વિજ તે શિવતુલ્યમુત્તમં
ન શિવાન્યત્તવ દૈવતં સુરેષુ ।
અત એવ નિરન્તરં (સુરેષુ) મહેશં
ભજ ભાલસ્ફુરદુજ્જ્વલત્રિપુણ્ડ્રઃ ॥ ૨૦૫॥

દ્વિજદૈવત દૈવતં મહેશં
યદિ નારાધયસિ પ્રકામમીશમ્ ।
દ્વિજદૈવત દાનસઙ્ગતા
તવ સત્યં વ વદામિ નાન્યથા ॥ ૨૦૬॥

અત એવ તદર્ચિતઃ શિવો
વિતરત્યેવ તદીપ્સિતં ફલમ્ ।
સિતકેવલભસ્મધારણં
વિધિવદ્ભૂરિ વિધાય સાદરમ્ ॥ ૨૦૭॥

સતતં શિવનિષ્ઠચેતસાં
તનુબન્ધો ન કદાપિ દુઃખદઃ ॥ ૨૦૮॥

શ્રુતિવોષિતભસ્મધારણં
વિહિતં યચ્છિવલિઙ્ગપૂજનમ્ ।
તદિદં દ્વયમાસ્તિકૈર્દ્વિજૈ-
ર્નપરિત્યાજ્યમિતિ શ્રુતિઃસ્વયમ્ ॥ ૨૦૯॥

દ્વિજ કેવલભસ્મધારણં
સતતં કેવલલિઙ્ગપૂજનમ્ ।
શ્રુતિબોધિતમિત્યવેહિ તસ્મા-
ત્તદુપાસ્યં દ્વયમપ્યનન્યભાજઃ ॥ ૨૧૦॥

શિવમેવ યજસ્વ સર્વકાલં
શિવભિન્નં ન યજસ્વ મોહતોઽપિ ।
શિવભિન્નસમર્ચનં વૃથૈવે-
ત્યનુવારં કુરુ નિશ્ચયં દ્વિજ ત્વમ્ ॥ ૨૧૧॥

શિવ શઙ્કર ચન્દ્રશેખરે
ત્યતિભક્ત્યા વદ સન્તતં મુદા ચ ।

શિવનામજપં વિહત્ય નાન્ય-
જ્જપોમાદપિ નામ સર્વથૈવ ॥ ૨૧૨॥

શિવનામસુધૈવ વિપ્ર પેયા
સતતં મુક્તિમભીપ્સતા દ્વિજેન ।
શિવનામસુધાપરા તુ જિહ્વા
દ્વિજ નાનાવિધભૂરિપુણ્યલભ્યા ॥ ૨૧૩॥

શિવનામ સુધારતૈવ જિહ્વા
મહતામેવ ભવત્યતોઽનુવારમ્ ।
શિવશઙ્કર ચન્દ્રશેખરેતિ
ત્રિપુરારે ઇતિ સઞ્જપસ્વ નિત્યમ્ ॥ ૨૧૪॥

શિવનામસુધાં મુહર્મુહુઃ
પિબ સાનન્દમનન્તરાયમાશુ ।
શિવનામસુધૈવ મુક્તિહેતુ-
ર્મુનિવૃન્દૈરખિલૈશ્ચ સેવ્યમાના ॥ ૨૧૫॥

અમૃતામૃતમાર્ય મુક્તિબીજં
શિવનામામૃતમિત્યવૈમિ નૂનમ્ ।
અત એવ મુહુર્મુહુર્મયા
શિવનામામૃતમેવ પીયતે ॥ ૨૧૬॥

શિવનામસુધાં નિપીય ભક્ત્યા
સુધિયઃ સાધુ સુધાં ચ નાદ્રિયન્તે ।
દિવિ પીતસુધાઃ પ્રયાન્તિ ગર્ભં
શિવનામામૃતપાઃ પ્રયાન્તિ મુક્તિમ ॥ ૨૧૭॥

શિવનામસુધા વિનિર્મિતા
ગિરિજેશેન પુરા કૃપાલુના ।
દ્વિજ સાત્કૃતપુણ્યસઞ્ચયૈ-
ર્મુહુરત્યન્તમુદા નિપીયતે ॥ ૨૧૮॥

રસભાજનભોજને નિદાનં
રસના હ્યેવ યયા મુહુઃ પ્રકામમ્ ।
શિવનામસુધા નિપીયતે
નિયમેનાન્યવિલાપનં વિહાય ॥ ૨૧૯॥

શિવમર્ચિતમન્વહં પ્રસૂનૈ-
ર્નવબિલ્વૈરપિ પશ્ય સાવધાનમ્ ।
ઇદમેવ ફલં મતં યતોઽક્ષ્ણો-
ર્વિલસત્પદ્મપલશતુલ્યકાન્ત્યોઃ ॥ ૨૨૦॥

નવબિલ્વદલૈઃ સમર્ચિતં
શિવલિઙ્ગં દ્વિજ સાધુ પશ્યતામ્ ।
વિવિધામિતઘોરપાપસઙ્ઘઃ
પ્રલયં યાતિ ન સંશયસ્તદૈવમ્ ॥ ૨૨૧॥

શ ृણુ શર્વકથામઘૌઘહન્ત્રી-
મનુવારં નિયમેન સાવધાનમ્ ।
ઇદમેવ ફલં વિનિશ્ચિતં
શ્રુતિભિઃ શ્રોત્રયુગસ્ય વસ્તુતસ્તુ ॥ ૨૨૨॥

નવકોમલબિલ્વપલ્લવૈઃ
શિવલિઙ્ગં સવિધાનમર્ચયિત્વા ।
શિવસાત્કૃતબિલ્વપલવા-
ન્સમુપાઘ્રાય વિનોદયસ્વ ચિત્તમ્ ॥ ૨૨૩॥

સ્પૃશ શઙ્કરમર્ચિતં ત્રિકાલં
સકલાઘૌઘવિનાશનાય નિત્યમ્ ।
ભજ ચેતસિ ભાલચન્દ્રમૌલિં
મુહુરાનન્દદમદ્વિતીયમેકમ્ ॥ ૨૪॥

મનસા વચસા ચ કર્મણા
શિવ એકઃ શિવયા સમન્વિતઃ ।
ભજનીય ઇતિ શ્રુતિઃ સ્વયં
પ્રતિવારં પ્રતિબોધકૃત્સદા ॥ ૨૨૫॥

ત્રિપુરારિકથાસુપૂજનેઽપિ
ત્રિપુરારેરભિવીક્ષણેઽપિ ચિત્તમ્ ।
મહતાં ભવતિ હ્યનન્યભાજાં
ન ભવત્યેવ દુરાત્મનાં કદાપિ ॥ ૨૨૬॥

- -

દધીચિરુવાચ
ઇતિ વિષ્ણુવચઃ શ્રુત્વા કણ્વઃ સન્તુષ્ટમાનસઃ ।
શિવાર્ચનપરો જાતઃ સર્વભાવેન સર્વદા ॥ ૨૨૭॥

અતો યત્નેન સતતં કર્તવ્યં શિવપૂજનમ્ ।
શિવાર્ચનં યતો નિત્યં ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૨૨૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશં ૬ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૭ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । ૧૮૫-૨૨૮॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 27 madhyArjunamahimAnuvarNan
. 185-228..

Notes:
Viṣṇu વિષ્ણુ delivers Upadeśa ઉપદેશ (to Ṛṣi Kaṇva ઋષિ કણ્વ) about the essentiality of worshiping Śiva શિવ and savoring the Ambrosia/Nectar of The Name of Śiva શિવનામામૃત / શિવનામસુધા.

Proofread by Ruma Dewan

*Vishnuproktam Shivarchanopadesham 6*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*